## उपमाने कर्मणि च । (४५/३३६६)

उपमीयते[1]ऽनेन इत्युपमानम् । [2]उपमाने कर्मणि उपपदे, चकारात् कर्तरि, धातोः णमुल् [3]प्रत्ययो भवति । घृतनिधायं निहितः । घृतमिव निहितः इत्यर्थः । सुवर्णनिधायं [4]निहितः । [5]सुवर्णमिव निहितः इत्यर्थः । कर्तरि खल्वपि – अजकनाशं नष्टः । अजक इव नष्टः । [6]चूडकनाशम् । [7]दन्तनाशम् ॥

## कषादिषु यथाविध्यनुप्रयोगः । (४६/३३६७)

निमूलसमूलयोः (३.४.३४/३३५५) इत्येतदारभ्य कषादयः । [8]एतेषु यथाविध्यनुप्रयोगो भवति । यस्माद् धातोः णमुल् प्रत्ययो [9]भवति स एव [10]अनुप्रयोक्तव्यः । ननु[11] [12]धातुसम्बन्धे प्रत्ययविधानादनुप्रयोगः सिद्ध एव ? यथाविधि इति नियमार्थं वचनम्, तथा चैवोदाहृतम् ॥

## उपदंशस्तृतीयायाम् । (४७/३३६८)

'दंश दशने' (धा.पा.९९०), अस्माद् [13]धातोरुपपूर्वात् तृतीयान्ते उपपदे णमुल् [14]प्रत्ययो भवति । मूलकोपदंशं भुङ्क्ते, मूलकेनोपदंशम्[15] । [16]आर्द्रकोपदंशम्, आर्द्रकेणोपदंशम् । अत्र विकल्पेनोपपदसमासः 'तृतीयाप्रभृतीन्यन्तरस्याम्' (२.२.२१/७८४) इति । [17]मूलकादि चोपदंशेः कर्म । भुजेः करणम् । [18]सर्वस्मिन्नेवात्र णमुल्प्रकरणे क्रियाभेदे सति वासरूपविधिना क्त्वापि[19] भवति । मूलकेनोपदश्य भुङ्क्ते ॥

## हिंसार्थानां च समानकर्मकाणाम् । (४८/३३६९)

तृतीयायाम् इत्येव । हिंसा प्राण्युपघातः । तदर्थानां धातूनामनुप्रयोगधातुना समानकर्मकाणां तृतीयान्ते उपपदे णमुल् [20]प्रत्ययो भवति । दण्डोपघातं गाः [21]कालयति, दण्डेनोपघातम्[22] । दण्डताडम्, दण्डेन ताडम् । समानकर्मकाणाम् इति किम् ? चोरं दण्डेनोपहत्य गोपालको गाः [23]कालयति ॥

## सप्तम्यां चोपपीडरुधकर्षः । (४९/३३७०)

उपशब्दः प्रत्येकमभिसम्बध्यते । उपपूर्वेभ्यः [24]पीडरुधकर्षेभ्यः सप्तम्यन्ते उपपदे, चकारात् तृतीयान्ते उपपदे, णमुल् प्रत्ययो भवति । पार्श्वोपपीडं शेते, पार्श्वयोरुपपीडम्[25], पार्श्वाभ्यामुपपीडम्[26] । व्रजोपरोधं गाः स्थापयति, व्रजे उपरोधम्, व्रजेनोपरोधम् । पाण्युपकर्षं धानाः [27]संगृह्णाति, पाणावुपकर्षम्, पाणिनोपकर्षम् । कर्षतेरिदं ग्रहणं न कृषतेः ॥

---

1. येन तद् ब.फ.ह. 2. उपमानवाचिकर्मणि ह. 3. प्रत्ययो नास्ति फ. 4. रजतनिधायम् इत्यधिकम् अ.क, रत्ननिधायम् इत्यधिकम् ब. 5. वाक्यमिदं नास्ति ब, निहितः नास्ति फ. 6. चरकनाशम् ब, चरकनाशं नष्टः फ, शुद्धकनाशं नष्टः क.ह. 7. दन्तनाशम् नास्ति फ, दन्तनाशं नष्टः अ. 8. तेषु कषादिषु ब. ह, एतेषु कषादिषु फ. 9. विहितः ब. फ, प्रविहितः ह. 10. धातुः इत्यधिकम् फ. ह. 11. च इत्यधिकम् फ. ह. 12. धातोः सम्बन्धे क. 13. धातोः नास्ति फ.ह. 14. प्रत्ययो नास्ति फ. 15. भुङ्क्ते इत्यधिकम् फ. 16. उदाहरणमिदं नास्ति क. 17. मूलकादिकं ब. 18. सर्वत्र अ. 19. प्रत्ययः इत्यधिकम् अ. ब. क. फ. 20. प्रत्ययो नास्ति फ. 21. चालयति अ. 22. दण्डेन ताडयति इत्यधिकम् क, इत्यादयः इत्यधिकम् फ. 23. पालयति ह, चारयति अ. 24. पीडादिभ्यः अ, पीडादिभ्यो धातुभ्यः फ, पीड रुध कर्ष इत्येतेभ्यो धातुभ्यः क. 25. शेते इत्यधिकम् ह. 26. इत्यादयो भवन्ति इत्यधिकम् फ. 27. गृह्णाति ह.